श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ प्रादुर्भावस्तबकः द्वितीयः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ प्रादुर्भावस्तबकः द्वितीयः ॥

भजे दुग्धाम्बुधिं यत्र परिष्कर्तुं हरेरुरः।
कठिनं सुकुमारं च रत्नं प्रादुरभूद् द्विधा ॥ **2.1** ॥

चतुर्मुखादीन् जगदम्ब डिम्भान्
    दुग्धैर्बहून् वर्धयितुं समृद्धैः।
पयः पयोधेः भवती दयाळुः
    सत्यं प्रजज्ञे सह कामधेन्वा ॥ **2.2** ॥

त्वयोज्ज्वलं दुग्धपयोधिमध्ये
    महोद्वयं देवि सहोदियाय।
हरेरुरोभूषणमेकमासीत्
    अन्यच्छिरोभूषणमष्टमूर्तेः ॥ **2.3** ॥

जीवं जीवं प्रत्युदारां समृद्धिं
    कर्तुं हर्तुं कञ्जधामे तमांसि।
सर्वं त्रातुं सत्कदम्बं पुराब्धेः
    चान्द्री मूर्तिर्जायते तावकी च ॥ **2.4** ॥

विश्वासेचनकं मुखं तव पयः सिन्धोरुदञ्चत्तदा
    शङ्कित्वा विगलत्कलङ्कमपरं चन्द्राङ्कुरं शङ्करः।
न्यस्तं मस्तपदे विधुं प्रथमतो नूनं भृशं न्यूनमि -
    त्यम्ब भ्रंशयितुं स्तुवन्निव शिरःकम्पं रमे निर्ममे ॥ **2.5** ॥

दातुं त्वां पुरुषोत्तमाय तनयां पद्मे गृहीतव्रतः
    प्रादात् कामगवीं मुदे सुमनसां पानीयमप्यम्बुधिः।
कञ्चित् सप्तिमनुत्तमं मघवते कल्पद्रुमं चेष्टदं
    सर्वज्ञाय सितांशुकं धृतजटावर्गाय दिग्वाससे॥ **2.6** ॥

हर्षादब्धेरमृतकलशं त्वाददे देवसङ्घः
    श्रीमानुच्चैःश्रवसममरक्ष्मापतिश्चन्द्रमीशः।
तेषामेकं न किल जगृहे त्वां शुभामेव शार्ङ्गी
    पद्मे सारग्रहणनिपुणः पारिशेष्याद् ग्रहीतुम्॥ **2.7** ॥

छाया मुखे जननि चान्द्रमसी तवासीत्
    कल्पद्रुपल्लवरुचिः करयोः पदोश्च।
सौधो रसे वचसि सम्पदतो न मिथ्या
    भ्रातृश्रियं सहभुवः परिबिभ्रतीति॥ **2.8** ॥

सुधादयः सन्तु तथापि तोयधिः
    ध्रुवं भवत्यैव भवत्यपत्यवान्।
गुणा रमे जाग्रतु विक्रमादयो
    गुणी महोदारतयैव भूपतिः॥ **2.9** ॥

श्राम्यत्पन्नगवक्त्रकोटरमरुन्नुन्नोर्मिसङ्घट्टनाद्
    झाटित्योर्ध्वविसारिदुग्धकणिकानिष्पन्नपुष्पाञ्जलिः।
सिन्धुर्मन्थवसुन्धराभृदुदयद्धुन्धुं ध्वनिच्छद्मना
    स्तुत्वा माधवमद्भुतामलभत त्वामम्ब कन्यामणिम्॥ **2.10** ॥

सिन्धुक्रोडस्थपुटविलुठन्मन्थलब्धावतारैः
    धुन्धुङ्कारैस्त्वदुदयमहे दुन्दुभिश्रीमति श्रीः।
प्राञ्चो झञ्झानिलपटुनटोन्नाटितप्रौढवीची -
    वल्लीहल्लीसकमकलयन्नन्तरुल्लीढहर्षाः॥ **2.11** ॥

बर्हं भ्रान्त्वा चिकुरमुदधेरुद्भवन्त्या भवत्या
    बद्धा मन्थक्षितिभृति सुरैः पन्नगाः स्विन्नगात्राः।
तत्कालैकोचितमतिजुषः त्रासतस्त्यक्तचेष्टाः
    राजीवाक्षप्रणयिनि भृशं रज्जुतामभ्यनैषुः॥ **2.12** ॥

आलोक्य तत्रभवतीमवतीर्णरूपां
    वृष्टा मुदा सुमनसः सुमनः प्रधानैः।
पिण्डीभवद्भिरखिलाम्ब पयः पयोधेः
    डिण्डीरखण्डनिवहैः सममाप्लवन्त॥ **2.13** ॥

अम्ब स्वयं त्वयि चिरादवतीर्णवत्यां
    मन्थश्रमव्यपनयाय मखाशनानाम्।
श्रान्ताहिरज्जुकबलीकृतिशङ्कयेव
    क्षीरोदरोधसि शनैरनिलश्चचार॥ **2.14** ॥

सान्द्रोत्कण्ठामसृणमधुजित्सादरापाङ्गधारा -
    सध्रीचीभिः श्वसनविसरद्दुग्धवीचीभिरब्धिः।
उद्वाहाख्यं कमपि भवतीमुत्सवं लप्स्यमानां
    मातस्तातो मधुरमनयन्मङ्गलस्नानकर्म॥ **2.15** ॥

सुधोदधिसमुद्भवत्सुरतरुच्छटान्तर्गते
    मनोज्ञमणिमण्टपे महति रत्नसिंहासने।
स्थितां मणिसरोरुहे त्रिदशसुन्दरीसेवितां
    जयाय भवतीमहं जननि सन्ततं चिन्तये॥ **2.16** ॥

अभ्यर्णस्फुरदप्सरःकरधृतैरुद्दामदुग्धाम्बुधिः
    स्वैरोत्सृत्वरवीचिकासहचरैः संवीजितां चामरैः।
हस्तालङ्कृतपङ्कजामभिनवाकल्पैरनल्पैः शुभाम्
    अम्ब त्वामुषसि स्मरामि जगतामातङ्ककूलङ्कषाम्॥ **2.17** ॥

भूयासुस्ते त्वदीया मयि हरिदयिते स्थूललक्ष्याः कटाक्षाः
    यल्लिप्साव्यग्रभर्गाद्यमरविरचितैरञ्जलीनां प्रपञ्चैः।
मन्थाद्रिक्षोभदुःस्थं कलशजलनिधेर्मध्यमुत्सृज्य वेलां
    प्राप्तै रेजे सरोजैरिव नवरजनीनायकालोकमूकैः॥ **2.18** ॥

अग्रे मुरारेररविन्दपीठे
    हरित्करीन्द्रैरभिषिच्यमानाम्।
अवेक्ष्य पुत्रीमखिलेश्वरीं त्वाम्
    आनन्दसिन्धौ निममज्ज सिन्धुः॥ **2.19** ॥

प्रसभमुदधिकन्ये पश्यतां देवतानां
    परमपुरुषवक्षः पीठमाढौकथास्त्वम्।
सह दयिततमेन स्वैरकेलौ सतीनां
    न खलु निजशिशूनां सन्निधिर्व्रीडहेतुः॥ **2.20** ॥

कलितकलशसागरोर्मिगङ्गं
    कमपि मुकुन्दमहः कलिन्दजौघम्।
कनकसुहृदभूषयत्तवाभा -
    विततिरतीव रमे सरस्वतीव॥ **2.21** ॥

द्युनदीशिशिरं शिरः पुरारेः
    भजतीन्दुर्भवती दयारसार्द्रम्।
हृदयं मुरहर्तुरब्धिजे वां
    उचितैव स्थितिरुद्भवानुरूपा॥ **2.22** ॥

कमले तोषयितुं त्वां कान्तभुजान्तरनिशान्तमुपयान्तीम्।
प्रायच्छदूर्मिहस्तैः प्रत्नं रत्नगणमम्बुधिः हरणम्॥ **2.23** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे प्रादुर्भावस्तबकः द्वितीयः॥